This question paper contains 8+2 printed pages]

# HPAS (M)—2014

## SANSKRIT

## Paper II

*Time : 3 Hours* *Maximum Marks : 150*

**नोट** :— केवल **पाँच** प्रश्नों के उत्तर दीजिए । प्रश्न संख्या **1** तथा **4** अनिवार्य हैं । **सभी** प्रश्नों के अंक समान हैं ।

1. बृहत्त्रयी के अन्तर्गत महाकवि श्रीहर्ष के नैषधचरितमहाकाव्य के काव्यगत वैशिष्ट्य का निरूपण कीजिए ।

**अथवा**

दशकुमारचरित की काव्यगत विशेषताओं को सोदाहरण प्रतिपादित कीजिए ।

P.T.O.

2. कौटिल्य के अनुसार कर ग्रहण व्यवस्था एवं गुप्तचरों के कार्यों का निरूपण कीजिए ।

**अथवा**

'गीतगोविन्द आध्यात्मिक शृंगार का मनोरम काव्य है'' उक्ति को सोदाहरण प्रतिपादित कीजिए ।

3. भवभूति के नाट्यकला का प्रतिपादन करते हुए अंगीरस का निर्धारण कीजिए ।

**अथवा**

मृच्छकटिक के नामकरण का अभिप्राय स्पष्ट करते हुए उसकी नाट्यशास्त्रीय तत्त्वों के आधार पर समीक्षा कीजिए ।

4. निम्नलिखित में से किन्हीं **तीन** श्लोकों की संस्कृत में व्याख्या कीजिए :

(*i*) हिरण्यमयेनपात्रेण सत्यस्यापिहितं मुखम् ।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥

(*ii*) असुर्या नाम ते लोका अन्धेन तमसावृताः ।

तां स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥

(*iii*) आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।

बुद्धिं तु सारथिं। विद्धि मनः प्रग्रहमेव च ॥

(*iv*) एष सर्वेषु भूतेषु गूढ़ोऽऽत्मा न प्रकाशते ।

दृश्यते त्वण्यया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः ॥

5. निम्नलिखित में से किन्हीं **तीन** सूक्तियों की संस्कृत में सप्रसंग व्याख्या कीजिए :

(*i*) सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।

(*ii*) न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ।

(*iii*) गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः ।

(*iv*) हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।

(*v*) चारित्रेण विहीन आढ्योऽपि च दुर्गतो नाम ।

(*vi*) आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।

हृदयेगृह्यते नारी यदीदं नास्ति गम्यताम् ।

6. निम्नलिखित में से किन्हीं **तीन** श्लोकों का हिंदी अथवा अंग्रेजी में अनुवाद कीजिए :

(क) मन्दं मन्दं नुदति पवनश्चानुकूलो यथात्वां

वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।

गर्भाधानक्षणपरिचयान्नूनमा बद्धमालाः

सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥

(ख) व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते

छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यते ।

माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते

नेतुं वाञ्छति य खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः॥

(ग) पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत।

गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः ॥

(घ) सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।

स्थितः सर्वोन्नतेनोर्वी क्रान्त्वा मेरुरिवात्मना ॥

(ङ) प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।

अमित्रजन्मित्रजिदोजसा स याद्विचारदृक्चारदृगप्यवर्तत ।

7. निम्नलिखित में से किन्हीं **तीन** श्लोकों का हिंदी **अथवा** अंग्रेजी में अनुवाद कीजिए :

(क) कर्कन्धूनामुपरि तुहिनं रंजयत्यग्रसन्ध्या

दार्भं मुंचत्युटजपटलं वीतनिद्रो मयूरः ।

वेदिप्रान्तात् खुरविलिखितादुत्थितश्चैष सद्यः

पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः ॥

(ख) यत्सावित्रैर्दीपितं भूमिपालैर्लोकश्रेष्ठैः साधु चित्रं चरित्रम्।

मत्सम्बन्धात्कश्मला किंवदन्ती स्याच्चेदस्मिन्हन्त

धिङ्मामधन्यम् ॥

(ग) किं त्वं कटीतटनिवेशितमुद्वहन्ती ताराविचित्ररुचिरं

रशनाकलापम् ।

वक्त्रेण निर्मथितचूर्णमनः शिलेन त्रस्ताऽद्भूतं नगरदैवतवत्

प्रयासि ॥

(घ) पुटकिनीपत्रान्तरितां व्याहृतोऽपि न खलु व्याहरति

प्रियाम्।

मुखे उद्व्यूढमृणालस्त्वयि दृष्टिं ददाति चक्रवाकः ॥

(ङ) सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम यस्मि–

न्नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।

आर्येणास्मिन् विरमविरमातः परं न क्षमोऽस्मि

प्रत्यावृत्तः पुनरिव स मे जानकीविप्रयोगः ॥

8. निम्नलिखित में से किन्हीं **तीन** की सप्रसंग व्याख्या कीजिए :

(क) गृहस्थस्य स्वकर्माजीवस्तुल्यैरसमानर्षिभिर्वैवाह्यमृतुगामित्वं देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च । ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा । वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाऽजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः ॥

(ख) अद्याप्यारूढमन्दरपरिवर्तावर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति। कमलिनीसंचरणव्यतिकरलग्ननलिननालकण्टकेव न क्वचिदपि निर्भरमाबध्नाति पदम् । अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विधिगन्धगजगण्डमधुपानमत्तेव परिस्खलति । पारुष्यमिवोपशिक्षितुमसिधारासु निवसति ।

विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम् । अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूल-दण्डकोशमण्डलमपि मुञ्चति भूभुजम् । लतेव विटपकानध्यारोहति । गंगेव वसुजनन्यपि तरंगबुद्‌बुद्‌चंचला दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः ।

(ग) मिथ्यामहात्म्यगर्वनिरर्भराश्च न प्रणमन्ति देवताभ्यः, अनर्थकायासान्तरितोपभोगसुखमित्युपहसन्ति विद्वज्जनम् जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम्, आत्म-प्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवादिने । किं वा तेषां साम्प्रतं येषामतिनृशंस-प्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचरिक्रियाः क्रूरैकप्रकृतयः पुरोधसो गुरवः पराभिसन्धानपरा मन्त्रिण

उपदेष्टारः नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः मारणात्मकेषु शस्त्रेष्वभियोगः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः ।

(घ) अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन्विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम् । अयं च ते कालः प्रतापमारोपयितुम् । आरूढप्रतापो राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति, इत्येतावद्-भिधायोपशशाम। उपशान्तवचसि शुकनासे चन्द्रापीड़स्ताभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, निमृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलंकृत इव, पवित्रीकृत इव, उद्भासित इव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

(ङ) सामर्ग्यजुर्वेदास्त्रयस्त्रयी । अथर्ववेदेतिहासवेदौ च वेदाः । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चांगानि । एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः । स्वधर्मो ब्राह्मणस्याध्यान-मध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति । क्षत्रियस्या-ध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च । वैश्यस्या-ध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च ।